मलकृद्रसतः स्वादु ग्राहि त्वग्दोषहृत् व्रणम्।
वस्तौ पाने तथाभ्यङ्गे नस्ये कर्णस्य पूरणे ॥
अनुपानविधौ चापि प्रयोज्यं वातशान्तये ॥ * ॥
अथ वरट्टतैलगुणाः।
कुसुम्भतैलमम्लं स्यादुष्णं गुरु विदाहि च।
चक्षुर्भ्यामहितं बल्यं रक्तपित्तकफप्रदम् ॥ * ॥
अथ खाखसबीजतैलगुणाः।
तैलं खाखसबीजानां बल्यं वृष्यं गुरु स्मृतम्।
वातहृत् कफकृच्छीतं स्वादुपाकरसञ्च तत् ॥ * ॥
अथ एरण्डतैलगुणाः।
एरण्डतैलं तीक्ष्णोष्णं दीपनं पिच्छिलं गुरु।
वृष्यं त्वच्यं वयःस्थापि मेधाकान्तिबलप्रदम् ॥
कषायानुरसं सूक्ष्मं योनिशुक्रविशोधनम्।
विस्रं स्वादु रसे पाके सतिक्तं कटुकं सरम् ॥
विषमज्वरहृद्रोगपृष्ठगुह्यादिशूलहृत्।
हन्ति वातोदरानाहगुल्माष्ठीलाकटीग्रहान् ॥
वातशोणितविड्बन्धब्रध्नशोथामविद्रधीन्।
आमवातगजेन्द्रस्य शरीरवनचारिणः।
एक एव निहन्तायमेरण्डस्नेहकेशरी ॥ * ॥
अथ राजतैलगुणाः।
तैलं सर्ज्जरसोद्भूतं विस्फोटव्रणनाशनम्।
कुष्ठपामाकृमिहरं वातश्लेष्मामयापहम् ॥ * ॥
अथ सर्व्वतैलगुणाः।
तैलं स्वयोनिगुणकृद्वाग्भटेनाखिलं मतम्।
अतः शेषस्य तैलस्य गुणा ज्ञेयाः स्वयोनिवत् ॥
इति भावप्रकाशे तैलवर्गः ॥ * ॥
अथ पुराणतैलगुणाः।
"वामं कल्ककषायवीर्य्यमखिलं चूर्णञ्च पक्षत्रयं
षण्मासान् घृतमोदकौ सहगुडौ मासत्रयं
गुग्गुलोः।
विज्ञानां रसभस्मनां सुविपुलं वीर्य्यन्तु वर्षत्रयं
किञ्चिद्गन्धविवर्ज्जितं गुणपरं तैलं पुराणं
महत् ॥"
इति नारायणदासकृतपरिभाषा ॥

तैलकं, क्ली, (स्वल्पं तैलम्। अल्पार्थे कन्।) अल्पपरिमाणतैलम्। इति व्याकरणम् ॥

तैलकन्दः, पुं, (तैलप्रधानः कन्दः।) कन्दविशेषः। तत्पर्य्यायः। द्रावककन्दः २ तिलाङ्कितदलः ३ करवीरकन्दसंज्ञः ४ तिलचित्रपत्रकः ५। अस्य गुणाः। लोहद्राविलम्। कटुत्वम्। उष्णत्वम्। वातापस्मारविषशोफनाशित्वम्। रसस्य बन्धकारित्वम्। देहसिद्धिकारित्वञ्च। इति राजनिर्घण्टः ॥

तैलकारः, पुं, (तैलं करोतीति। कृ + "कर्म्मण्यण्।" ३।२।१। इत्यण्।) वर्णसङ्करजातिविशेषः। कलु इति भाषा। स कोटकस्त्रीगर्भे कुम्भकाराज्जातः। इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम् ॥ तत्पर्य्यायः। घूवरः २ चाक्रिकः ३ तैली ४। इति हेमचन्द्रः ॥ (यथा, आर्य्यासप्तशत्याम्। ५६२।
"स्नेहमयान् पीडयत किं चक्रेणापि तैल-
कारस्य।
चालयति पार्थिवानपि यः स कुलालः परं
चक्री ॥"
यात्राकालेऽस्य दर्शनममङ्गलसूचकम्। यथा, ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्याये।
"ददर्शामङ्गलं राजा पुरो वर्त्मनि वर्त्मनि ॥"
"कुम्भकारं तैलकारं व्याधं सर्पोपजीविनम् ॥")

तैलकिट्टं, क्ली, (तैलस्य किट्टं मलम्।) तैलमलम्। खलि इति ख्यातम्। तत्पर्य्यायः। पिण्याकः २ खलिः ३ तैलकल्कजः ४। अस्य गुणाः। कटुत्वम्। गौल्यत्वम्। कफवातप्रमेहनाशित्वञ्च। इति राजनिर्घण्टः ॥

तैलङ्गः, पुं, देशविशेषः। इति शब्दरत्नावली ॥ (यथा, शब्दार्थचिन्तामणिधृतवचनम्।
"श्रीशैलन्तु समारभ्य चोलेशान्मध्यभागतः।
तैलङ्गदेशो देवेशि! ध्यानाध्ययनतत्परः ॥")

तैलचौरिका, स्त्री, (तैलस्य चौरिकेव। चौरवत् तैलपानादस्यास्तथात्वम्।) तैलपायिका। इति शब्दरत्नावली ॥

तैलद्रोणी, स्त्री, (तैलपूर्णा द्रोणी।) कण्ठपर्य्यन्तमज्जनार्थतैलपूर्णकाष्ठादिनिर्म्मितपात्रविशेषः। तत्रावस्थितिगुणाः। वातरोगव्याकुष्ठरोगपङ्गुबाधिर्य्यमिन्मिनगद्गदधन्वङ्गस्तब्धपृष्ठप्रचलितपवनगात्रकम्पकपाटीग्रीवाभङ्गापतन्त्रक्षयरुधिरभवमूत्रकृच्छ्रवस्तिरोगेषु शस्तत्वम्। इति राजवल्लभः ॥

तैलपर्णकं, क्ली, (तैलं तैलयुक्तमिव पर्णमस्य। कप्।) ग्रन्थिपर्णवृक्षः। इति भावप्रकाशः ॥

तैलपर्णिकं, क्ली, (तैलयुक्तं पर्णमस्यास्य। यद्वा, तिलपर्णी वृक्ष उत्पत्तिस्थानत्वेनास्त्यस्येति। ठन्।) हरिचन्दनम्। इत्यमरः। २।६।१३१ ॥ चन्दनविशेषः। तत्तु तिलपर्णवृक्षजातं धवलं सुशीतलम्। इति भरतः ॥ (अस्य पर्य्याया यथा,
"श्रीखण्डं चन्दनं न स्त्री भद्रश्रीस्तैलपर्णिकः।
गन्धसारो मलयजस्तथा चन्द्रद्युतिश्च सः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
वृक्षविशेषे, पुं। यथा, हरिवंशे। २२३। ६८।
"कदम्बाश्चैव भव्याश्च दाडिमा बीजपूरकाः।
कालीयका दुकूलाश्च हिङ्गवस्तैलपर्णिकाः ॥")

तैलपर्णी, स्त्री, (तिलपर्णे वृक्षे जाता। "तत्र जातः।" ४।३।२५। इत्यण् ततो ङीप्।) चन्दनम्। श्रीवासः। (पर्य्यायोऽस्या यथा,—
"तैलपर्णी दधित्थाख्यः पिण्याको रक्तशीर्षकः।
वेष्टो रसाङ्कः श्रीवासः श्रीपिष्टसरलद्रवौ ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।) सिह्लकः। इति मेदिनी। णे, ६६ ॥

तैलपा, स्त्री, (तैलं पिबतीति। पा पाने + "आतोऽनुपसर्गे कः।" ३।२।३। इति कः।) तैलपायिका। इति राजनिर्घण्टः ॥

तैलपायिका, स्त्री, (तैलं पिबतीति। पा + ण्वुल्। टापि अत इत्वम्।) कीटविशेषः। तैलापोका इति आरसुला इति च भाषा। तत्पर्य्यायः। पयोष्णी २। इत्यमरः। २।५।२६ ॥ तैलचौरिका ३। इति शब्दरत्नावली ॥ तैलपा ४। इति राजनिर्घण्टः ॥ तैलाम्बुका ५ स्वधाधारा ६। इति जटाधरः ॥ (यथा, महाभारते। १३। १०४। १११।
"गृहे पारावता धन्याः शुकाश्च सहसारिकाः।
गृहेष्वेते न पापाय तथा वै तैलपायिकाः ॥")

तैलपिपीलिका, स्त्री, (तैलप्रिया पिपीलिका।) पिपीलिकाभेदः। तत्पर्य्यायः। उदङ्का २ कपिजाङ्गिका ३। इति राजनिर्घण्टः ॥

तैलफलः, पुं, (तैलप्रधानं फलं यस्य।) इङ्गुदी। विभीतकः। इति राजनिर्घण्टः ॥

तैलभाविनी, स्त्री, (तैलं भावयति सद्गन्धं करोतीति। भू + णिच् + णिनि + ङीप्।) जातीपुष्पवृक्षः। इति राजनिर्घण्टः ॥

तैलमाली, स्त्री, (तैलानां माला समूहो यत्र। ततो गौरादित्वात् ङीष्।) वर्त्तिः। इति शब्दमाला ॥

तैलम्पाता, स्त्री, (तिलपातोऽस्यां वर्त्तते। "घञः सास्यां क्रियेति ञः।" ४।२।५८। इति ञः। "श्येनतिलस्य पाते ञे।" ६।३।७१। इति मुम्।) स्वधा। तिलपातोऽस्यां स्वधायां सा। इति लिङ्गादिसंग्रहे अमरभरतौ ॥

तैलसाधनं, क्ली, (तैलं साधयति निष्पादयति सुगन्धीकरोतीति। साध + णिच् + ल्युः।) गन्धद्रव्यविशेषः। काकला इति भाषा। तत्पर्य्यायः। काकोलम् २ कोलकम् ३ गन्धव्याकुलम् ४ कक्कोलकम् ५ कोषफलम् ६। इति शब्दचन्द्रिका ॥

तैलस्फटिकः, पुं, (तैलाक्तः स्फटिक इव। स्वच्छत्वात् तथात्वम्।) रत्नमणिः। इति हेमचन्द्रः। ४। १३४ ॥

तैलागुरु, क्ली, (तैलाक्तमिव अगुरु।) दाहागुरु। इति राजनिर्घण्टः ॥

तैलाटी, स्त्री, (तैलेन तैलप्रदानेन अटति दूरीभवतीति। अट गतौ + अच् + गौरादित्वात् ङीष्।) वरटा। इति हेमचन्द्रः। ४।२८१ ॥

तैलाम्बुका, स्त्री, (तैलं अम्बु जलमिव पेयं यस्याः। कप्। टाप् च।) तैलपायिका। इति जटाधरः ॥

तैलिकः, पुं, (तैलं पण्यत्वेनास्त्यस्य। तैल + ठन्।) तैलकारः। इति व्याकरणम् ॥ (अस्य अपाङ्क्तेयत्वमुक्तम्। यथा, मनुः। ३। १५८।
"समुद्रयायी वन्दी च तैलिकः कूटकारकः ॥")

तैलिनी, स्त्री, (तैलं भक्ष्यत्वेन आश्रयत्वेन वा अस्त्यस्येति। तैल + इनि + ङीप्।) कीटभेदः। तत्पर्य्यायः। तैलकीटः २ षड्बिन्दुः ३ दद्रुनाशिनी ४। इति राजनिर्घण्टः ॥ दशावर्त्तिः। इति शब्दमाला ॥

तैलिशाला, स्त्री, (तैलिनस्तिलसम्बन्धिनस्तैलकारस्य वा शाला गृहम्।) यन्त्रगृहम्। इति हेमचन्द्रः। ४। ६३ ॥ घाणिघर इति भाषा ॥

तैली, [न्] पुं, (तैलं निष्पादकत्वेन पण्यत्वेन वास्त्यस्येति। तैल + इनिः।) तैलकारः। इति हेमचन्द्रः। ३। ५८१ ॥ तैलसम्बन्धिनि, त्रि ॥